# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्यः (SEM-4)** **प्रश्नपत्रम् – 2** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.C.5.4.10 (New)** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –30/03/2019 सन्दर्भग्रन्थः – महाभारतेकर्णपर्व ८३ अध्यायाः (कतिपयाध्यायाः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 कश्चिदेकस्य ससन्दर्भसप्रसङ्गपूर्वकं व्याख्या कार्या।** **05**

(1) कर्णस्य निधनं श्रुत्वा विजयं फाल्गुनस्य च।
अश्रद्धेयमहं मन्ये वधं कर्णस्य संजय ॥

(2) सर्वभूतमयं दृष्ट्वा तमजं जातः पतिम्।
देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः ॥

**प्रश्नः-2 कर्णवधस्य संक्षिप्त वृत्तान्तं लिखित्वा धृदराष्ट्रसंजयोः संवादं लिखत।** **10**

**अथवा**

**सात्यकि कर्णयोः युद्धवर्णनं लिखित्वा अर्जुनेन कृतं कौरवसेनासंहारं लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 कश्चिदेकस्य ससन्दर्भसप्रसङ्गपूर्वकं व्याख्या कार्या।** **05**

(1) ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः।
तथा नित्यं हिते युक्तो मयूराज भवस्व नः ॥

(2) शिक्षाप्रमादश्च बलं धृतिश्च द्रोणे महास्त्राणि च संततिश्च।
स यदेगान्मृत्युवशं महात्मा सर्वानव्यातुरानद्य मन्ये ॥

**प्रश्नः-4 कर्णस्य युद्धाय प्रस्थानं लिखित्वा शैल्यकर्णयोः संवादं लिखत।** **10**

**अथवा**

**ग्रन्थानुसारं त्रिपुरवधोपाख्यानं लिखत।**

### तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 कश्चिदेकस्य ससन्दर्भसप्रसङ्गपूर्वकं व्याख्या कार्या।** **05**

(1) न हि कर्णः समुभ्दुतो भयार्थमिह भद्रक।
विक्रमार्थमहं जातो यशोऽयं च तथाऽऽत्यजः ॥

(2) शक्रतुल्य बलो युद्धे यमतुल्यः पराक्रमे।
समतुल्यस्तथास्त्रेण स कथं वै निषूदितः ॥

**प्रश्नः-6 एकं सविस्तरं लिख्यताम्।** **10**

(1) कौरवपाण्डवसेनयोः युद्धवर्णनं लिखत।

(2) कर्णार्जुनयोः युद्धप्रशंसां लिखत।

**प्रश्नः-7 कश्चिदेकस्य ससन्दर्भसप्रसङ्गपूर्वकं व्याख्या कार्या।** **05**

(1) जाग्रत्स्वयंश्च कौन्तेय कर्णमेव सदा हृदम्।
पश्यामि तत्र तत्रैव कर्णभूतमिदं जगत्।।

(2) अत्यद्भुतमहं मन्ये पाण्डवेयस्य विक्रमम्।
यदेकः समरे सर्वान् योधयामास मामकान्।।

**प्रश्नः-8 एकं सविस्तरं लिख्यताम्।** **10**

(1) कर्णपुत्रभानुसेनस्य वधं लिखत।

(2) कर्णेन पाण्डवसेनायाः संहारं लिखत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) कर्णपर्वणि कति अध्यायाः सन्ति ?

(2) महाभारतस्य समये कति अक्षौहिणी सेना आसन् ?

(3) अङ्गदेशस्य राजा कः?

(4) कर्णस्य गुरोः नाम किम्?

(5) कर्णस्य पितुः नाम किम्?

(6) शल्यः कस्य सारथी असीत् ?

(7) महाभारते कति श्लोकाः सन्ति ?

(8) कर्णः कस्य सखा आसीत् ?

(9) धृतराष्ट्रस्य संवादः केन सह चलति ?

(10) धनञ्जय अर्थात् कः?

(11) कर्णस्य पुत्रस्य नाम किम् ?

(12) कर्णपर्वणः कतमो क्रमोऽस्ति ?

(13) धृतराष्ट्रसंजययोः संवादः कस्मिन् अध्याये आगच्छति ?

(14) कर्णपर्वणि प्रथमाध्याये कति श्लोकाः सन्ति ?

(15) दुर्योधनस्य पितुः नाम किम्?